# Shridhara Suprabhatam

# श्रीधरसुप्रभातम्

## Document Information

Text title : Shridhara Suprabhatam 3

File name : shrIdharasuprabhAtam3.itx

Category : deities_misc, gurudev, shrIdharasvAmI, suprabhAta, aShTaka

Location : doc_deities_misc

Author : kAshyapa lakShmInArAyaNa sharmaNau

Proofread by : Paresh Panditrao

Description/comments : shrIdharasvAmI stotrANi. shrIdharasandeshaH

Latest update : January 14, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 15, 2023

*sanskritdocuments.org*

# श्रीधरसुप्रभातम्

मङ्गलं –

मोक्षश्रियन्धृतवते सर्वसम्पत्करायते ।
सर्वान्तरात्मने नित्यं श्रीधरार्याय मङ्गलम् ॥ १॥

सर्वाङ्गसुन्दरायैव सर्वेष्टार्थप्रदायिने ।
सर्वभूतहितार्थाय श्रीधरार्याय मङ्गलम् ॥ २॥

सच्चिदानन्दरूपाय नित्यमुक्तस्वरूपिणे ।
निर्विकल्पाय शान्ताय श्रीधरार्याय मङ्गलम् ॥ ३॥

ज्ञानिने मौनिने श्रीमत्तुलसीवनमालिने ।
सर्वसम्मानिने तुभ्यं श्रीधरार्याय मङ्गलम् ॥ ४॥

भजतां कल्पवृक्षाय नमतां कामधेनवे ।
स्मरतां भववैद्याय श्रीधरार्याय मङ्गलम् ॥ ५॥

श्रीदत्तात्रेयरूपाय गुरुराजाय तेजसे ।
श्रीसमर्थप्रियायास्तु श्रीधरार्याय मङ्गलम् ॥ ६॥

समत्वयोगशीलाय ब्रह्मिष्ठाय महात्मने ।
धर्मसंस्थापनाचार्य श्रीधरार्याय मङ्गलम् ॥ ७॥

लीलामानुषदेहाय सत्यप्रेममयाय च ।
सर्वलोकैस्सत्कृताय श्रीधरायास्तु मङ्गलम् ॥ ८॥

लक्ष्मीकान्तेन रचितं सुप्रभातं गुरोः परम् ।
पठतामुषसीप्रेम्णा प्रसीदति गुरुः सदा ॥

इति श्रीमद् परिव्राजकाचार्य श्रीश्रीधरभगवत्पादान्ते वासिना काश्यप लक्ष्मीनारायण शर्मणौ विरचितं श्रीधरसुप्रभातं सम्पूर्णम् ।

Proofread by Paresh Panditrao

*Shridhara Suprabhatam*

pdf was typeset on January 15, 2023

Please send corrections to *sanskrit@cheerful.com*